# श्री सोमनाथसंस्कृत-युनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, अक्तुबर - 2019

| | | |
|---|---|---|
| **कक्षा – शास्त्री-3** | **सत्रम् – 5** | **गुणाः - 70** |
| **विषयः – वेदः** | **प्रश्नपत्रम् - 6 - CC - 3.5.10** | **समयः-** 3 तः 6 |
| **दिनाङ्कः- 15/10/2019** | **संदर्भग्रन्थः –** अर्थसंग्रहः | |

**( प्रथमान्वितिः - युनिट-1 )**

**प्र-1 द्वयोः ससन्दर्भं व्याख्या कार्या। 10**

1. अपौरुषेयं वाक्यं वेदः।
2. प्रयोजनेच्छाजनितक्रियाविषयव्यापारः अर्थीभावना।
3. यजेतेत्यत्रास्त्यंशद्वयम् - यजि धातुः प्रत्ययश्च।
4. तत्र कर्मस्वरूपमात्र बोधको विधिः उत्पत्तिविधिः।

**प्र-2 एकः समाधेयः। 10**

1. विधेः स्वरूपमुपस्थाप्य तस्य प्रकारानपि उपवर्णयत।
2. विशिष्टविधेः सोदाहरणं स्वरूपमुपकल्पयत।

**( द्वितीयान्वितिः - युनिट-2 )**

**प्र-3 द्वयोः ससन्दर्भं व्याख्या कार्या। 10**

1. अङ्गप्रधानसम्बन्धबोधकोविधिर्विनियोगविधिः।
2. तस्यविधेः सहकारिभूतानि षट् प्रमाणानि।
3. निरपेक्षोरवः श्रुतिः।
4. यजेतेत्याख्यातानिहितसंख्याया आर्थीभावनाङ्गत्वं समानाभिधानश्रुतेः।

**प्र-4 एकस्य सविस्तरमुत्तरं लिखत। 10**

1. अर्थसंग्रहालोके विनियोगविधेः श्रुत्यादि षट् प्रमाणानां विषये यथाज्ञानं लिखत।
2. विनियोक्त्रीं श्रुतिं वर्णयत। (अर्थसंग्रहानुसारम्)

**( तृतीयान्वितिः - युनिट-3 )**

**प्र-5 द्वयोः ससन्दर्भं व्याख्या कार्या। 10**

1. वैकृतानामङ्गानां प्राकृताङ्गानुवादेन विहितानां संदंशपतितानां विकृत्यर्थत्वं सन्निधिपाठात्।
2. पशुधर्माणामग्निषोमीयार्थत्वमनुष्ठानसादेश्यात्।
3. पदार्थबोधकवाक्यानां यः क्रमः स पाठक्रमः।
4. प्रयोग समवेतार्थस्मारकाः मन्त्राः।

**प्र-6 एकस्य सविस्तरमुत्तरं लिखत।** **10**

1. अधिकारविधेः स्वरूपमुपपादयत।
2. नियमविधेः सोदाहरणं स्वरूपमुपकल्पयत।

**प्र-7 दशानां लघूत्तराणि लिखत।** **10**

1. जैमिनिनय- इत्यस्य कोऽर्थः
2. द्वादशलक्षणी - इत्यत्र लक्षणशब्दस्य कोऽर्थः
3. अधातो धर्म जिज्ञासा - इत्यत्र जिज्ञासा पदस्य किं तात्पर्यम्
4. को भवति वेदार्थः लौ गाक्षिभास्करानुसारम्।
5. स्वाध्यायोऽध्येतव्यः - इत्यस्य किमस्ति दृष्टं प्रयोजनम्
6. विशयः - इत्यस्य कोऽर्थः
7. स्वर्गकामो यजेत् - इत्यत्र किमस्ति प्रयोजनपदम्
8. स्वर्गकामो यजेत् - इत्यत्र किमस्ति प्रयोजनवत्
9. भावनायाः कौ द्वौ भेदौ स्तः
10. मीमांसकमते यजेत् - इत्यस्य को भवति भावः
11. भावनानिरूपणप्रसंगे भावयति - इत्यत्र कोऽस्ति समानार्थकः शब्दः (क्रिया वा)
12. न्याय मञ्जर्याः कोऽस्ति रचनाकारः
13. राणकरत्नम् - इति टीकायाः कोऽस्ति रचयिता
14. मीमांसानयविवेकस्य कोऽस्ति रचनाकारः
15. मीमांसान्यायप्रकाशस्य रचयिता कोऽस्ति

************